"पक्वः शोफः सन्धिजः संस्रवेद्यः
सान्द्रं पूयं पूतिपूयालसः सः ॥"
इति सुश्रुतः ॥
("पूयालसः सोपनाहः स्रावाश्चत्वार एव च ।
पर्व्वणीकालजी जन्तुग्रन्थिसन्धौ न वामया: ॥"
"पूयालसन्तु तं विद्यात् सन्धौ कानीनके व्रणा-
मिति वचनात् ।" इति भावप्रकाशस्य मध्यखण्डे
चतुर्थे भागे ॥)

पूर, ई य ङ पूर्त्तौ । इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-सक०-सेट् । निष्ठायामनिट् ।) दीर्घौ । ई, पूर्णः । य ङ, पूर्य्यन्ते पितरस्त्वयेति हलायुधः । पूर्त्तिरिहाप्यायनम् । इति दुर्गादासः ॥

पूर, क पूर्त्तौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) दीर्घौ । क, पितॄन् पूरयति श्राद्धे हव्यैः कव्यैश्च यः सदा । इति हलायुधः ॥ इति दुर्गादासः ॥

पूरं, क्ली, (पूरयति सौगन्ध्येनेति । पूर+कः ।) दाहागुरु । इति राजनिर्घण्टः ॥

पूरः, पुं, (पूरयतीति । पूर+कः ।) जलसमूहः । (यथा, रघौ । ३ । १७ ।
"महोदधेः पूर इवेन्दुदर्शनात्
गुरुः प्रहर्षः प्रबभूव नात्मनि ॥")
व्रणसंशुद्धिः । खाद्यविशेषः । इति मेदिनी । रे, ६० ॥ (प्राणायामादिकर्त्तुर्नासारन्ध्रेण बहिःपवनाकर्षणम् । यथा, भागवते । ३ । २८ । ९ ।
"प्राणस्य शोधयेन्मार्गं पूरकुम्भकरेचकैः ।
प्रतिकूलेन वा चित्तं यथास्थिरमचञ्चलम् ॥"
बीजपूरः । तत्पर्य्यायो यथा,—
"बीजपूरो मातुलुङ्गः सुफलः फलपूरकः ।
लुङ्गुधः पूरकः पूरो बीजपूर्णोऽम्लकेशरः ॥"
इति वैद्यकरत्नमालायाम् ॥)

पूरकः, पुं, (पूरयतीति । पूरि+ण्वुल् ।) बीजपूरः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"बीजपूरो मातुलुङ्गः सुफलः फलपूरकः ।
लुङ्गुषः पूरकः पूरो बीजपूर्णोऽम्लकेशरः ॥"
इति वैद्यकरत्नमालायाम् ॥)
गुणकाङ्कः । इति लीलावती ॥ ध्यानादिकर्त्तृनासिकागतोच्छ्वासः । ब्रह्मध्यानपूर्ब्बकप्राणायामाङ्गतत्तन्मन्त्रं जपन् वामनासिकया वायुना देहपूरणम् । (यथा, हठयोगप्रदीपिकायाम् । २ । ७१ ।
"प्राणायामस्त्रिधा प्रोक्तो रेचपूरककुम्भकैः ।
सहितः केवलश्चेति कुम्भको द्विविधो मतः ॥")
यथाच व्यासः ।
"आदानं रोधमुत्सर्गं वायोस्त्रिभिः समभ्यसेत् ।
ब्रह्माणं केशवं शम्भुं ध्यायेद्देवाननुक्रमात् ॥
पूर्ब्बवचने त्रिजपमात्राभिधानादत्र त्रिभिरिति वीप्सा सन्ध्यात्रयापेक्षया ।
ब्रह्माणं केशवं शम्भुं ध्यायन् मुच्येत बन्धनात् ॥
इति योगियाज्ञवल्क्यः ।
'भूर्भुवःस्वर्महर्जनस्तपः सत्यं तथैव च ।
प्रत्योङ्कारसमायुक्तं तथा तत् सवितुः पदम् ॥
ॐ आपो ज्योतिरित्येतच्छिरः पश्चात् योजयेत् ।
त्रिरावर्त्तनयोगात्तु प्राणायामस्तु शब्दितः ॥
पूरकः कुम्भको रेच्यः प्राणायामस्त्रिलक्षणः ।
नासिकाकृष्ट उच्छ्वासो ध्मातः पूरक उच्यते ॥
कुम्भको निश्चलः श्वासो मुच्यमानस्तु रेचकः ॥
मोचनं विशेषयति विष्णुपुराणम् ।
नासंवृतमुखो जृम्भेद्धासकाशौ च वर्ज्जयेत् ।
नोद्वेजयेत् सशब्दञ्च न मुञ्चेत् पवनं बुधः ॥"
इत्याह्निकाचारतत्त्वम् ॥
षोडशचतुरन्यतरसंख्यकप्रणवबीजान्यतरजपेनैकनासापुटकरणकप्राणायामाङ्गवायुपूरणम् । यथा, मूलमन्त्रस्य बीजस्य प्रणवस्य वा षोडशवारजपेन वामनासापुटे वायुपूरकं कुर्य्यादिति तन्त्रसारः ॥ * ॥ क्ली, प्रेतदेहनिष्पादकाशौचकालदेयदशपिण्डम् । यथा,—
"पूरकेण तु पिण्डेन देहो निष्पाद्यते यतः ।
कृतस्य करणायोगात् पुनर्नावर्त्तयेत् क्रियाम् ॥"
इति वायुपुराणम् ॥
ऋष्यशृङ्गः ।
"न स्वधाञ्च प्रयुञ्जीत प्रेतपिण्डे दशाह्निके ।
भाषेतैतच्च वै पिण्डं यश्चदत्तस्य पूरकम् ॥"
अत्र भाषणविधौ एतत्पिण्डं यश्चदत्तस्य पूरकमित्येतावन्मात्रस्तुतेः शिरःपूरकमित्यादिविशेषोल्लेखे प्रमाणं नास्ति । इति स्मार्त्तभट्टाचार्य्यः ॥ प्रेतपिण्डैस्तथा दत्तैर्देहमाप्नोति भार्गवेति विष्णुधर्म्मोत्तरे देहश्रुतेर्देहपूरकमिति प्रयोगापत्तेश्च । तस्मादनिरुद्धभट्टाद्युक्तः केवलपूरकप्रयोग एव युक्त इति । शातातपः ।
"भर्त्तुः पिण्डप्रदाने तु साध्वी स्त्री चेद्रजस्वला ।
वस्त्रं त्यक्त्वा पुनः स्नात्वा सैव दद्याच्च पूरकम् ॥"
इति शुद्धितत्त्वम् ॥ * ॥
पूरणकर्त्तरि, त्रि । इति शब्दरत्नावली ॥ (यथा, मनुः । ९ । २८९ ।
"प्राकारस्य च भेत्तारं परिखाणाञ्च पूरकम् ।
द्वाराणाञ्चैव भङ्क्तारं क्षिप्रमेव प्रवासयेत् ॥")

पूरणं, क्ली, (पूर्य्यते अनेनेति । पूर+करणे ल्युट् ।) पिण्डप्रभेदः । इति मेदिनी । णे, ६४ ॥ वृष्टिः । कुटन्नटम् । इति शब्दमाला ॥ अङ्कानां गुणनम् । इति शुभङ्करः ॥ वापतन्तुः । इति हेमचन्द्रः ॥

पूरणः, पुं, (पूर्य्यतेऽनेनेति । पूरि+करणे ल्युट् ।) विश्वतैलम् । इति धरणिः ॥ सेतुः । इति हारावली ॥ (पूरयतीति । पूरि+कर्त्तरि ल्युः ।) समुद्रः । इति संक्षिप्तसारोणादिवृत्तिः ॥ पूरके, त्रि । इति मेदिनी । णे, ६३ ॥ (यथा, हरिवंशे । १२६ । ५२ ।
"आसन्नः सन्नतरः साधनानां
श्रद्धावतां श्राद्धवृत्तिप्रणेता ।
पतिर्गणानां महतां सतृक्तीनां
मायान्वितः पूरणः षड्गुणानाम् ॥")

पूरणी, स्त्री, (पूर्य्यते अनयेति । पूरि+ल्युट्+ङीप् ।) शाल्मलिवृक्षः । इत्यमरः ।२।४।४६॥ (अस्या पर्य्यायान्तरं यथा, भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ।
"शाल्मलिस्तु भवेन्मोचा पिच्छिला पूरणीति च ।
रक्तपुष्पा स्थिरायुश्च कण्टकाढ्या च तूलिनी ॥")
पूर्य्यतेऽनया पूरणी । यथा पञ्चानां पूरणी पञ्चमी॥

पूराम्लं, क्ली, (पूरं पूरकमम्लमत्र ।) वृक्षाम्लम् । इति राजनिर्घण्टः ॥

पूरिका, स्त्री, (पूर्य्यते इति । पूरि+कः । स्त्रियां ङीप् । पूरी । ततः स्वार्थे कन् । टाप् पूर्ब्बह्रस्वश्च ।) पिष्टकभेदः । पूरी इति कचुरी इति च भाषा । यथा,—
"माषाणां पिष्टिकां युक्तां लवणार्द्रकहिङ्गुभिः ।
तया पिष्टिकया पूर्णा समिता कृतपोलिका ।
ततस्तैले विपक्वा सा पूरिका कथिता बुधैः ॥"
अस्या गुणाः ।
"रुच्या स्वाद्वी गुरुः स्निग्धा वातपित्तासृग्दूषिका ।
चक्षुस्तेजोहरी चोष्णा पाके वातविनाशिनी ॥
तथैव घृतपक्वापि चक्षुष्या रक्तपित्तहृत् ॥"
इति भावप्रकाशः ॥
(अस्या गुणान्तरं यथा,—
"पूरिकाघृतपूरन्तु शिरोयशमनं परम् ।
हृद्यं संतर्पणं स्वादु वातक्षयनिवारणम् ॥"
इति हारीते प्रथमे स्थाने द्वादशेऽध्याये ॥)

पूरितं, त्रि, (पूर्य्यते स्मेति । पॄ पूरि वा+क्तः । "वा दान्तशान्तपूर्णेति ।" ७ । २ । २७ । इति पक्षे इट् ।) कृतपूरणम् । तत्पर्य्यायः । पूर्णम् २ । इत्यमरः । ३ । १ । ९८ ॥ गुणितञ्च ॥

पूरुषः, पुं, (पुरति अग्रे गच्छतीति । पुर+"पुरः कुषन् ।" उणा० ४।७४। इति कुषन् । "अन्येषामपि दृश्यते ।" ६।३।१३७ । इति निपातनात् दीर्घः ।) पुरुषः । पुमान् । इत्यमरः ।२।६।१॥
अथ पूरुषलक्षणम् ।
"पञ्चदीर्घं चतुर्ह्रस्वं पञ्चसूक्ष्मं षडुन्नतम् ।
सप्तरक्तं त्रिगम्भीरं त्रिविशालं प्रशस्यते ॥
बाहुनेत्रद्वयं कुक्षिर्द्वौ तु नासा तथैव च ।
स्तनयोरन्तरञ्चैव पञ्चदीर्घं प्रशस्यते ॥
ग्रीवा च कर्णौ पृष्ठञ्च ह्रस्वे जङ्घे सुपूजिते ।
चत्वारि यस्य ह्रस्वानि पूजां प्राप्नोति नित्यशः ॥
सूक्ष्माण्यङ्गुलिपर्व्वाणि दन्तकेशनखत्वचम् ।
पञ्च सूक्ष्माणि येषां हि ते नरा दीर्घजीविनः ॥
नासा नेत्रञ्च दन्ताश्च ललाटञ्च शिरस्तथा ।
हृदयञ्चैव विज्ञेयमुन्नतं षट् प्रशस्यते ॥
पाणिपादतलौ रक्तौ नेत्रान्तरनखानि च ।
तालुकोऽधरजिह्वा च सप्तरक्तं प्रशस्यते ॥
स्वरो बुद्धिश्च नाभिश्च त्रिगम्भीरमुदाहृतम् ।
उरः शिरो ललाटञ्च त्रिविस्तीर्णं प्रशस्यते ॥*॥
कटिर्विशाला बहुपुत्त्रभागी
विशालहस्तो नरपुङ्गवः स्यात् ।
उरो विशालं धनधान्यभागी
शिरो विशालं नरपूजितः स्यात् ॥